# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – वास्तुशास्त्रम्** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – बृहद्वास्तुमाला, मुहूर्तचिन्तामणिः, मत्स्यपुराणम् (वास्त्वध्यायः)** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

प्रश्नः १ **अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ जलाशयारामसुरप्रतिष्ठा सौम्यायने जीवशशाङ्कशुक्रे।
दृश्ये मृदुक्षिप्रचरध्रुवे स्यात् पक्षे सिते स्वर्क्षतिथिक्षणे वा॥

२ पूर्वाह्ने चोत्तमं प्रोक्तं मध्याह्ने मध्यमं बुधैः।
सायाह्ने न मया प्रोक्ता स्वगृहे चाशुभे विधौ॥
कदाचिन्निश्यपि प्रोक्ता प्रतिष्ठा च कृते युगे।
कलौ युगेऽतिदोषाय प्रतिष्ठा निशि मानवैः॥

३ सलिलोद्यानयुक्तेषु कृतेष्वकृतकेषु च।
स्थानेष्वेतेषु सान्निध्यमुपगच्छन्ति देवताः॥

४ वनोपान्तनदीशैलनिर्झरोपान्तभूमिषु।
रमन्ते देवता नित्यं पुरेषूद्यानवत्सु च॥

प्रश्नः २ चतुःषष्टिपदवास्तुनरस्य विचारः क्रियताम्।

प्रश्नः ३ वसिष्ठमते प्रतिष्ठाविचारः क्रियताम्।

प्रश्नः ४ शिलान्यासविचारः क्रियताम्।

प्रश्नः ५ वास्तुशास्त्रपद्धतिः विलिख्यताम्।

प्रश्नः ६ **अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ धनधान्यं च वायव्ये कर्मशालां ततो बहिः।
एवं वास्तुविशेषः स्याद् गृहभर्तुः शुभावहः॥

२ सप्ताँश्च चैकचक्रं च रथं तस्य प्रकल्पयेत् ।
मुकुटेन विचित्रेण पद्मगर्भसमप्रभम् ॥

३ सर्ववास्तुविभागेषु विज्ञेया नवधा नव ।
एकाशीतिपदं कृत्वा वास्तुवित्सर्ववास्तुषु ॥

४ सशल्यं भयदं यस्मादशल्यं शुभदायकम् ।
हीनाधिकाङ्गतां वास्तोः सर्वथा तु विवर्जयेत् ॥

**प्रश्नः ७** मत्स्यपुराणानुसारं एकाशीतिपदवास्तुविचारः क्रियताम् ।

**प्रश्नः ८** मत्स्यपुराणानुसारं वास्तुविद्यागृहनिर्णयाध्यायस्य सारांशः विलिख्यताम् ।

**प्रश्नः ९** मुहूर्तचिन्तामणौ प्रदत्तस्य शुभाशुभप्रकरणस्य सारांशः विलिख्यताम् ।

**प्रश्नः १०** मुहूर्तचिन्तामणौ प्रदत्तं वधूप्रवेशप्रकरणं विविच्यताम् ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ वास्तुमध्ये कूपस्य फलं किम् ?
२ गृहस्य ईशाने कूपः स्यात् चेत् फलं किम् ?
३ सूर्यनक्षत्रात् त्रीणि नक्षत्राणि कूपमध्ये यदि स्युः तदा गृहनिर्माणस्य फलं किम् ?
४ कस्मिन् नक्षत्रे कूपारम्भः भवति ?
५ श्रावणभाद्रपदमासयोः कीदृशं वृक्षारोपणं शुभं भवति ?
६ यमस्य दिशा का ?
७ सूर्यस्य दिशा का ?
८ पूर्वोत्तरयोः मध्ये का दिशा भवति ?
९ शिलान्यासः कस्यां दिशि भवति ?
१० गृहप्रवेशस्य पूर्वं को विधिः कर्तव्यः ?
११ वास्तुशास्त्रस्य कति प्रवर्तकाः सन्ति ?
१२ अग्निकोणस्य स्वामी कः ग्रहः भवति ?
१३ वितानशब्दस्य अर्थः कः ?
१४ रिक्तातिथयः काः सन्ति ?
१५ शनौ पूर्णा फलं किम् ?

****